# Shri Vallabhesha Hridayam

# શ્રીવલ્લભેશહૃદયમ્

## Document Information

Text title : Vallabhesha Hridayam

File name : vallabheshahRRidayam.itx

Category : ganesha, hRidaya

Location : doc_ganesha

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : Vinayaka Tantra

Acknowledge-Permission: http://kshetrayaatra.blogspot.com

Latest update : July 27, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2021

*sanskritdocuments.org*

# શ્રીવલ્લભેશહૃદયમ્

શ્રીદેવ્યુવાચ -
વલ્લભેશસ્ય હૃદયં કૃપયા બ્રૂહિ શઙ્કર ।
શ્રીશિવ ઉવાચ -
ઋષ્યાદિકં મૂલમન્ત્રવદેવ પરિકીર્તિતમ્ ॥ ૧॥

ૐ વિઘ્નેશઃ પૂર્વતઃ પાતુ ગણનાથસ્તુ દક્ષિણે ।
પશ્ચિમે ગજવક્ત્રસ્તુ ઉત્તરે વિઘ્નનાશનઃ ॥ ૨॥

આગ્નેય્યાં પિતૃભક્તસ્તુ નૈરૃત્યાં સ્કન્દપૂર્વજઃ ।
વાયવ્યામાખુવાહસ્તુ ઈશાન્યાં દેવપૂજિતઃ ॥ ૩॥

ઊર્ધ્વતઃ પાતુ સુમુખો હ્યધરાયાં ગજાનનઃ ।
એવં દશદિશો રક્ષેત્ વિકટઃ પાપનાશનઃ ॥ ૪॥

શિખાયાં કપિલઃ પાતુ મૂર્ધન્યાકાશરૂપધૃક્ ।
કિરીટિઃ પાતુ નઃ ફાલં ભ્રુવોર્મધ્યે વિનાયકઃ ॥ ૫॥

ચક્ષુષી મે ત્રિનયનઃ શ્રવણૌ ગજકર્ણકઃ ।
કપોલયોર્મદનિધિઃ કર્ણમૂલે મદોત્કટઃ ॥ ૬॥

સદન્તો દન્તમધ્યેઽવ્યાત્ વક્ત્રં પાતુ હરાત્મજઃ ।
ચિબુકે નાસિકે ચૈવ પાતુ માં પુષ્કરેક્ષણઃ ॥ ૭॥

ઉત્તરોષ્ઠે જગદ્વ્યાપી ત્વધરોષ્ઠેઽમૃતપ્રદઃ ।
જિહ્વાં વિદ્યાનિધિઃ પાતુ તાલુન્યાપત્સહાયકઃ ॥ ૮॥

કિન્નરૈઃ પૂજિતઃ કણ્ઠં સ્કન્ધૌ પાતુ દિશામ્પતિઃ ।
ચતુર્ભુજો ભુજૌ પાતુ બાહુમૂલેઽમરપ્રિયઃ ॥ ૯॥

અંસયોરમ્બિકાસૂનુરઙ્ગુલીશ્ચ હરિપ્રિયઃ ।
આન્ત્રં પાતુ સ્વતન્ત્રો મે મનઃ પ્રહ્લાદકારકઃ ॥ ૧૦॥

પ્રાણાઽપાનૌ તથા વ્યાનમુદાનં ચ સમાનકમ્ ।
યશો લક્ષ્મીં ચ કીર્તિં ચ પાતુ નઃ કમલાપતિઃ ॥ ૧૧॥

હૃદયં તુ પરમ્બ્રહ્મસ્વરૂપો જગદિપતિઃ ।
સ્તનૌ તુ પાતુ વિષ્ણુર્મે સ્તનમધ્યં તુ શાઙ્કરઃ ॥ ૧૨॥

ઉદરં તુન્દિલઃ પાતુ નાભિં પાતુ સુનાભિકઃ ।
કટિં પાત્વમલો નિત્યં પાતુ મધ્યં તુ પાવનઃ ॥ ૧૩॥

મેઢ્રં પાતુ મહાયોગી તત્પાર્શ્વં સર્વરક્ષકઃ ।
ગુહ્યં ગુહાગ્રજઃ પાતુ અણું પાતુ જિતેન્દ્રિયઃ ॥ ૧૪॥

શુક્લં પાતુ સુશુક્લસ્તુ ઊરૂ પાતુ સુખપ્રદઃ ।
જઙ્ઘદેશે હ્રસ્વજઙ્ઘો જાનુમધ્યે જગદ્ગુરુઃ ॥ ૧૫॥

ગુલ્ફૌ રક્ષાકરઃ પાતુ પાદૌ મે નર્તનપ્રિયઃ ।
સર્વાઙ્ગં સર્વસન્ધૌ ચ પાતુ દેવારિમર્દનઃ ॥ ૧૬॥

પુત્રમિત્રકલત્રાદીન્ પાતુ પાશાઙ્કુશાધિપઃ ।
ધનધાન્યપશૂંશ્ચૈવ ગૃહં ક્ષેત્રં નિરન્તરમ્ ॥ ૧૭॥

પાતુ વિશ્વાત્મકો દેવો વરદો ભક્તવત્સલઃ ।
રક્ષાહીનં તુ યત્સ્થાનં કવચેન વિના કૃતમ્ ॥ ૧૮॥

તત્સર્વં રક્ષયેદ્દેવો માર્ગવાસી જિતેન્દ્રિયઃ ।
અટવ્યાં પર્વતાગ્રે વા માર્ગે માનાવમાનગે ॥ ૧૯॥

જલસ્થલગતો વાઽપિ પાતુ માયાપહારકઃ ।
સર્વત્ર પાતુ દેવેશઃ સપ્તલોકૈકસઙ્ક્ષિતઃ ॥ ૨૦॥

॥ ફલશ્રુતિઃ ॥

ય ઇદં કવચં પુણ્યં પવિત્રં પાપનાશનમ્ ।
પ્રાતઃકાલે જપેન્મર્ત્યઃ સદા ભયવિનાશનમ્ ॥ ૨૧॥

કુક્ષિરોગપ્રશમનં લૂતાસ્ફોટનિવારણમ્ ।
મૂત્રકૃચ્છ્રપ્રશમનં બહુમૂત્રનિવારણમ્ ॥ ૨૨॥

બાલગ્રહાદિરોગાણાન્નાશનં સર્વકામદમ્ ।
યઃ પઠેદ્ધારયેદ્વાઽપિ કરસ્થાસ્તસ્ય સિદ્ધયઃ ॥ ૨૩॥

યત્ર યત્ર ગતશ્ચાશ્પી તત્ર તત્રાઽર્થસિદ્ધિદમ્ ॥ ૨૪॥

યશ્શ્ૃણોતિ પઠતિ દ્વિજોત્તમો વિઘ્નરાજકવચં દિને દિને ।
પુત્રપૌત્રસુકલત્રસમ્પદઃ કામભોગમખિલાંશ્ચ વિન્દતિ ॥ ૨૫॥

યો બ્રહ્મચારિણમચિન્ત્યમનેકરૂપં ધ્યાયેજ્જગત્રયહિતેરતમાપદઘ્નમ્ ।
સર્વાર્થસિદ્ધિં લભતે મનુષ્યો વિઘ્નેશસાયુજ્યમુપેન્ન સંશયઃ ॥ ૨૬॥

॥ ઇતિ શ્રીવિનાયકતન્ત્રે શ્રીવલ્લભેશહૃદયં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*Shri Vallabhesha Hridayam*

pdf was typeset on June 8, 2021

Please send corrections to *sanskrit@cheerful.com*